MANU Script 19

WITH — SANSKRIT KHAKE. (14)

120

NAME. SATYA NARIAN

Udiapan

BIKRMI 1969 1220-MJ.

1220

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

Sans. MS.
294.592
S254

1220-MS.

सत्यनारायण उद्यापन; संस्कृत
भाषा तथा लि०; पं० सुन्दरलाल
शर्मा द्वारा सोमवार १ वैशाख
१९६६ वि० लि०
२२ पत्रक ७" पं० प्र० पृ०

संस्कृत हे० ले०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

Mamsari Sdlay Naram Vdiafan

Bikrami 1964 vide Khate

1220-MS

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स.उ.
१

॥ॐस्वस्तिश्रीगणेशायनमः श्रीगुरुच
रणकमलेभ्योनमः अथसत्यनारायण
उद्यापनविधिर्लिख्यते ॥ व्रतिसंक्रांतौ
पौर्णमास्यांचैकादश्यांयस्मिन्कस्मिन्दि
नेप्रथमतस्नानादिकंकृत्वा शिखाबध्वा
गायत्रीमंत्रेणआचमनंकृत्वा द्विर्वात्रिः
दीपंधूपाद्यसमर्जिस्थाप्य ततगंगा
दितीर्थेविन्यास्य ॐगंगाद्यसरितेति
मंत्रेणान्यास्य विनियोगंकृत्वा ॐअ
स्यशरीरपवित्रमन्त्रस्यरुद्रऋषिर
नुष्टुप्छन्दः नारायणादेवताशरीरप
वित्रेविनियोगः ॐअपवित्रःपवि
त्रोवा इतिमंत्रेणपवित्रंकृत्वा गंगावि
ष्णोहरिआत्मानंसर्ववस्तून्सिंचयेत् गं
धंललाटंधृत्वा ॐचन्दनेवंदते· इ
तिमंत्रेण ॐअस्याश्रीआसनशोध
नमन्त्रस्यव्यासमेरुपृष्ठऋषिःसुतलं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

छन्दः कूर्मो देवता आसनशोधने वि
नियोगः ॐ आधारशक्तिकूर्मासना
य नमः जलगन्धेत्यादिपूजयेत्
प्रार्थना ॐ पृथिवी त्वया धृता लोका
देवि त्वं विष्णुना धृता त्वं च धारय मां
देवी पवित्रं कुरु चासनं ततः दिग्बंधनं
कृत्वाः चतुर्दिशाभूतशुद्धि ॐ अपस
र्पन्तु ये भूता ये भूता भुवि संस्थिता ये
भूता विघ्नकर्तारं ते नश्यन्तु शिवाज्ञया
भूतानामवरोधेन यज्ञकर्मसमुद्भवं
इति दिग्बंधनं अथ प्रतिज्ञासंकल्पं कृ
त्वा ॐ तत्सद्ब्रह्मणो द्वितीयप्रहरा
र्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वं
तरे अष्टाविंशतिमे युगे कलियुगे प्र
थमचरणे ऽमुकसंवत्सरे ऽमुकाय
ने ऽमुकर्तौ ऽमुकमासे ऽमु

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स.उ. कपक्षे ऽमुकतिथौ ऽमुकवासरे ऽमुक
२ नक्षत्रे योगकरणे मुहूर्ते ऽमुकगोत्रोत्प
न्नोहं जन्मराशी नामप्रसिद्धराशी नाम
तः ऽमुकशर्म्माहं कृतकायकमानसि
कसांसर्गिकज्ञाताज्ञातसमस्तदोषक्षया
र्थे श्रुतिस्मृतिपुराणोक्तफलवाप्ति
कामः श्रीसत्यनारायणप्रीत्यर्थेनम्र
शादात्कायवाङ्मनोभिर्महापातका
दिदोषनिवृत्तिपूर्वककामनार्थमम
नोवांछितफलसिद्ध्यर्थेगणपत्यादि
पंचोपचारैनवग्रहः मंडलाधिष्ठदे
वताब्रह्मादिदेवताचतुर्वेददशदिग्पा
लद्वारपालइत्यादिपूजनश्रीसत्यना
रायणप्रतिमापूजनब्राह्मणवेदपा
ठोर्णायुग्यादिदानगोदानइत्यादिका
र्यमहंकरिष्ये इतिप्रतिज्ञासंकल्पः॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ततः नवग्रहमंडलाधिष्ठसर्वदेवता
नांस्थापनंकुर्य्यात् ततपुष्पाक्षतंगृही
त्वा स्वस्तिवाचनंपठेत् ॐस्वस्तिनइ
न्द्रोवृद्धश्रवाः स्वस्तिनः पूषाविश्ववे
दाः ।। स्वस्तिनस्तार्क्ष्योऽरिष्टनेमिःस्व
स्तिनोवृहस्पतिर्द्दधातु ।। ॐपयः पृथि
व्यांपयऽओषधीषु पयोदिव्यंतरिक्षे
पयोधाः । पयस्वतीः प्रदिशः संतुमं
ह्यम् ।। ॐविष्णोरराटमसिविष्णोः
श्नप्त्रेस्थोविष्णोःस्यूरसिविष्णो
र्ध्रुवोसि । वैष्णवमसिविष्णवेत्वा ।।
अग्निर्द्देवतावातोदेवतासूर्य्योदेवता
चन्द्रमादेवतावसवोदेवता रुद्रादेव
तादित्यादेवतामरुतोदेवताविश्वेदे
वादेवतावृहस्पतिर्द्देवतेन्द्रोदेवतावरु
णोदेवता ।। ॐद्यौः शान्तिरंतरिक्षंशृ

स॰ उ॰ शान्तिः पृथिवी शान्तिरापः शान्तिरोषध
३ यः शान्तिः वनस्पतयः शान्तिर्विश्वेदे
वाः शान्तिर्ब्रह्म शान्तिः सर्वं शान्तिः
शान्तिरेव शान्तिः सा मा शान्तिरेधि॥
सुशान्तिर्भवतु॥ विश्वानि देव सवितु
र्दुरितानि परासुव यद्भद्रं तन्नऽआसुव
इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय
प्रभरामहे मतीः॥ यथा शमसद् द्विपदे च
तुष्पदे विश्वं पुष्टं ग्रामेऽस्मिन्ननातु
रम्॥ एतन्ते देव सवितर्यज्ञं प्राहुर्बृ
हस्पतये ब्रह्मणे। तेन यज्ञमव तेन य
ज्ञपतिं तेन मामव॥ मनो जूतिर्जुषता
माज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्व
रिष्टं यज्ञं समिमं दधातु विश्वे
देवास इह मादयन्तामो३म् प्रतिष्ठ
एष वै प्रतिष्ठा नाम यज्ञो यत्रैतेन यज्ञे

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नयजन्तेसर्वेमेवप्रतिष्ठितंभवति ॥
ॐम् गणानान्त्वागणपतिꣳहवामहे प्रियाणान्त्वाप्रियपतिꣳहवामहे निधीनान्त्वानिधिपतिꣳहवामहे वसोमम। आहमजानिगर्भधमात्वमजासिगर्भधम॥ नमोगणेभ्योगणपतिभ्यश्चवोनमो नमोव्रातेभ्योव्रातपतिभ्यश्चवोनमो नमोगृत्सेभ्योगृत्सपतिभ्यश्चवोनमो नमोविरूपेभ्योविश्वरूपेभ्यश्चवोनमः ॐ सुमुखश्चैकदन्तश्चकपिलोगजकर्णकः लम्बोदरश्चविकटोविघ्ननाशोविनायकः धूम्रकेतुर्गणाध्यक्षोभालचन्द्रोगजाननः द्वादशैतानिनामानियः पठेच्छृणुयादपि विद्यारंभेविवाहेच प्रवेशेनिर्गमेतथा। संग्रामेसंकटेचैव

स·उ· व विघ्नस्तस्य न जायते श्रीगणपतये
४ नमः इति स्वस्तिवाचनम् गणपत्यादिन
वग्रहमंडलाधिष्ठदेवता इहागच्छ इह
तिष्ठेत्यावाह्य॥ अथ ध्यानं ॐ शुक्लां
बरधरं देवं शशिवर्णं चतुर्भुजं प्रस
न्नवदनं ध्यायेत्सर्वविघ्नोपशांतये॥
न॥ अभिप्रीत्यर्थसिद्ध्यर्थं पूजितो॥
यःसुरैरपि सर्वविघ्नहरे तस्मै॥
श्रीगणाधिपतये नमः॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अथगणपतिपूजनम् अथावाहनम्
विनायकंमहाप्रभुंसर्वदेवनमस्कृ
तं अविघ्नंसर्वकार्य्येषु देवमावाह
याम्यहम् आसनम् नानारत्नस
मायुक्तं मुक्ताहारविभूषितं स्व
र्णसिंहासनंचारुप्रीत्यर्थंप्रतिगृह्य

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स०उ०
५

नाम् अर्घ्यपाद्यम् गौरीपुत्रनमस्तेस्तु
शंकरप्रियसर्वदा भक्त्यापाद्यंमयादत्तं
गृहाणप्रणतप्रियः इतिपाद्यं ततःज
लगंधाक्षत पुष्प धूप दीप नैवेद्य
फल डोरिका गणपतिदेवताभ्योनमः
प्रार्थना॰ ॐवक्रतुंडमहाकायाः सूर्य
कोटिसमप्रभं अविघ्नंकुरुमेदेवसर्
वेकार्येषुसर्वदा दक्षिणा ॐप्र
द्यकृतैतत गणपतिपूजन सांगता
सिद्ध्यर्थं इदंताम्रद्रव्यं दैवत मसु
कगोत्राय ऽमुकशर्म्मणे ब्राह्मणा
यादक्षिणांत्वामहं ददे न ॥
इति गणेशपूजनम् ॥ अथों
कारपूजनम् ॥ अथावाहनम्
॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative



ॐ आवाहयाम्यहं देवमोंकारपरमेश्व
रं त्रिमात्रं अक्षरं दिव्यं त्रिपदं च त्रिदे
वकं अक्षरं त्रिगुणाकारं सर्वाक्षरम
यं शुभं अणवं प्रणवं हंसं त्वष्टारं
परमेश्वरं अनादिनिधनं देवमप्र
मेयमनातनं परंपरतरं बीजं निर्म
लं निष्कलं शुभम् ॐकार इहाग
च्छ इहातिष्ठेत्यावाहयस्थापयेत् (
जलगन्धेत्यादि पूजयेत् अथे ना·
ॐकारविंदुसंयुक्तं नित्यं ध्यायंति यो
नः कामिदं मोक्षदं चैव ॐकारायने

स.उ. मोनमः दक्षिणा ॐ अद्यकृतैतत् ॐका
६ रपूजनसांगतासिद्ध्यर्थमिदं ताम्रं सम्पै
दैवतं यथानामगोत्राय ब्राह्मणाय द
क्षिणात्वामहं ददे तत् स्वस्तिप्रतिवचनं
षोडशमातृपूजा ॥ ॐ गौरीपद्मा
शचीमेधासावि
त्रीविजयाजया
देवसेनास्वधा
स्वाहामातरोलो
कमातरः हृ
ष्टिःपुष्टिस्तथा

गो.	प.	श.	मे.
सा.	वि	ज.	दे.
स्व.	स्वा	मा.	लो.
हृ.	पु.	तु.	कु.

तुष्टिस्तथात्माकुलदेवता एतानिज
लगंधादिभिः पूजयेत् प्रार्थना गौ
रीपद्मा प्रभृतयो मातरो षोडशैवधा
पूज्यं मे सर्वकार्येषु प्रयच्छंतुरापुष
सदा दक्षिणा ॐ अद्यकृतैतत्षो
डशमातृसांगतासि० अथचक्रवि

ञावरणम् यथा चतुर्मुखो ब्रह्मा सर्व
वेदधरः प्रभुः तथा त्वं मम यज्ञेऽ
स्मिन् ब्रह्मा भव द्विजोत्तम गृहीत्वा
नुकरं गुह्यं यजमानः पठेदिदम् अ
स्य कर्म्मणः प्रतिष्ठापनार्थे त्वं ब्रह्मा
भव अहं भवामि ब्रह्मा ब्रूयात् आ
चार्यवरणम् आचार्यस्तु यथा
स्वर्गे शक्रादीनां बृहस्पतिः तथा त्वं
मम यज्ञेऽस्मिन्नाचार्यस्त्वं भव प्रभो
गृहीत्वानु० ऋग्वेदः पद्मपत्राक्षो
गायत्र्यः सोमदेवताः अत्रिगोत्रस्तु
विप्रेन्द्र ऋत्विक् त्वं मे मखे भव गृही
त्वानु० कानराक्षो यजुर्वेदस्त्रिष्टुभो
ब्रह्मदैवतः भारद्वाजस्तु विप्रेन्द्र ऋ
त्विक् त्वं मे मखे भव गृहीत्वानु० सा
मवेदस्तु पिंगाक्षो त्रिष्टुभो विष्णुदै

स॰ ३॰
७

वन: काश्यपेयस्तु विप्रेंद्रऊरुत्विकृत्वं
मेमखेभव गृहीत्वानु॰ श्रीमज्ज्ञोपवक्वे
दोऽनुष्टुपोरुद्रदेवत: वैश्वानीगोत्रस्तु
विप्रेंद्रऊरुत्विकृत्वंमेमरवेभव गृहीत्वा
नु॰ जलगंधेत्यादिभिपूजयेत अथ
आशीर्वाद ॐ अंग्रेवेदस्तुयजुर्वेद: सां
मवेदोह्यथर्वण: ब्रह्मवाक्यंस्थितोनि
त्यं हृन्यंनांतवशात्रव: अपुत्र: पुत्रि
ण: संतुपुत्रिण: सन्तुपौत्रिण: अध
ना: सधनासंतु सन्तु सर्वांघेसाध।
का: विप्रहस्ताद्गृहीणियाद्यस्तु
पुष्पफलाक्षतान् चत्वारस्तववर्द्धं
तामायु: कीर्तिर्यशोवलम् ॥
इतिचतुर्वेदपूजनम् ॥ ॥ अथ
घृदीपजोतिपूजा ॥ दीपज्योतिरि
हागच्छइहातिष्ठ त्यावाह्य ज



लगंधेत्यादिभिः पूजये
त् प्रार्थना शुभं भवतु
कल्याणमारोग्यं सुख
संपदाममशत्रुविनाश
यदीपज्योतिर्नमोस्तुते।
ॐअग्निज्योतिर्दीपज्योतिः पूजनसांग।
तासिद्ध्यर्थं इदं तांबूलयुक्तं देवतं यथा
नाम गोत्राय ब्राह्मणाय दक्षिणां त्वां म
हं ददे ते स्वस्तिप्रतिवचनं ततो मंत्र

वसुधारा पूजनं घटोपरि लिखेत्।
ॐवसोः पवित्रमसि शतधारं वसोः प
वित्रमसि सहस्रधारं देवस्त्वा सवि
ता पुनातु वसोः पवित्रेण शतधारेण
सुप्वा कामधुक्षः जलगन्धेत्यादि
भिः पू० प्रार्थना लक्ष्मीश्रीर्धृतिः पुष्टि
मेधा प्रजा स्वाहा सरस्वती गौर्या
स्मिन्कार्येषु संपन्ना घटमातरः॥ ॐ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स॰उ॰ अद्य कृतैतत्सप्तवसुधारापूजनसांग
८
तासिद्ध्यर्थं इदं ताम्रं द्रव्यं दैवतं यथा
नामगोत्राय ब्राह्मणाय दक्षिणात्वाम
हं ददे स्वस्ति प्र॰ अथ सप्तऋषिआ
वाहनपूजन ।। ऋषिणां सप्तभिर्देवाउ
त्रागच्छतमाश्रिता मेरुपदक्षिणात्वाम

सप्तऋषिमावाहयाम्यहं जलगंधपा
दिभिः प्र॰ प्रार्थना॰ कश्यपोत्रिर्भरद्वा
जविश्वामित्रोथगौतमः यमदग्नि
वसिष्ठश्च सप्तऋषिनमोस्तुते ।।
ॐ अद्य कृतैतत्सप्तऋषिपूजनसां
गतासिद्ध्यर्थं इदं ताम्रं द्रव्यं दैव

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तेयथानामगोत्रायब्राह्मणायदक्षिणा
त्वामहंददे॥ अथशेषनागपूजन॥ आवाहनंकृत्वा

पातललोकमास्त्रित्यशिरोरत्नेयमंडि॰
ता धरणीधारिणेनित्यंनागमावाहया
म्यहं जलगंधेत्यादिपूजयेत॥ प्रार्थ
ना नमस्तेदेवदेवेशनमस्तेधरणीध
र: नमस्तेसर्वनागेन्द्र नमस्तेकालरूप
क: दक्षिणा ॐअद्यकृतेतस्यशेषना
गपूजनसांगतासिद्ध्यर्थं इदंताम्र
व्यंदैवतंयथानामगोत्रायब्राह्मणा
यदक्षिणांत्वामहंददे॥ स्वस्तिप्र०
शेषनागपूजितोसिद्धमस्तु: अथ
योगिनीपूजन आवाहनं. ॐआवाह
याम्यहंदेवियोगिनीपरमेश्वरी यो

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स॰ उ॰
२

नाभ्यासेन संतुष्टा परध्यानसमन्विता दि
व्यकुंडलसंकाशा दिव्यज्वालात्रिलोचना
मूर्तिमती ह्यमूर्ती च उग्रा चैवोग्ररूपि
णी अनेकभावसंतुष्टा संसारर्णवतारि
णी यज्ञं कुर्वंतु निर्विघ्नं श्रेयोयच्छं
तु मातरः दिव्ययोगी महायोगी सिद्ध
योगिगणेश्वरी प्रेताशी डाकिनी का
ली कालरात्री निशाचरी हुंकारी सिद्धवे
ताली खर्परी भूतगामिनी ऊर्ध्वके
शी विरूपाक्षी शुष्कांगी मांसभोजनी
फ्त्कारी वीरभद्राक्षी धूम्राक्षी कल
हप्रिया रक्ता च घोररक्ताक्षी विरूपा
क्षी भयंकरी चौरिका मारिका चण्डी
वाराही मुण्डधारिणी भैरवी चक्रिणी
क्रोधा दुर्मुखी प्रेतवासिनी कालाक्षी
मोहिनी चक्रीकंकाली भुवनेश्वरी कु

रुडलानालकौमारीयमदूतीकरालिनी
कौशिकीयक्षिणीयक्षीकौमारीयंत्रवा
हिनी दुर्घटे विकटे घोरेकपालेविश्व
लंघने श्रीष्टेना चतुःषष्टिःसमाख्या
तायोगिन्योहिवरप्रदाः त्रैलोक्येपूजि
तानिनित्यंदेवमानुष्यभोगिभि ए तानि
जलगंधेत्यादिपूजयेत् दक्षिणा ॐ
अद्यकृतैतत् योगिनीपूजनसांगता
सिद्धार्थं इदंनामंत्रए द्र्येदैवतंयथा
नामगोत्रायब्राह्मणायदक्षिणात्वाम
हंददेत् स्वस्ति प्र० अथपञ्चलोक
पालानांपूजनम् ॐगणानांत्वा०इति
मंत्रेण श्रीभगवन्तगणपतयेनमः ॐ
अम्बेअम्बिकेऽम्बालिकेनमानय
तिकश्चनससस्त्यश्विकः सुभद्रिकांका
पिलवासिनी श्रीदुर्गायैनमः ॐवातो

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स·उ· वामनोवागंपर्वेः सन्नवि॑ सतितेऽग्ने
१० स्वस्वामायुंजस्तेऽस्मिंयज्ञमादधुः
वायवेनमः ३ ॐऊर्ध्वोऽस्यसमिधो
भवन्त्यूर्ध्वोशुक्रोशोचिं॑ष्यग्नेद्युमत
मासुप्रतीकस्यसूनोः आकाशाय
नमः ४ ॐअश्विनौभेषज्यनतेज
सेब्रह्मणेब्रह्मवर्चसायाभिषिंचामि
इन्द्रायनमः ५ ॐअद्यकृतैतत्पंचलो
कपालपूजनसांगतासिद्ध्यर्थमिदं
नानाद्रव्यदैवतंयथानामगोत्राय
ब्राह्मणायदक्षिणांत्वामहंददेन स्व
स्तिनुक्ताः॰ इतिपञ्चलोकपालपूज
नम् अथदशदिक्पालानांपूजनम्
ॐत्रातारमिन्द्रमवितारमिन्द्रं॑ हवेहवे
सुहवंशूरमिन्द्रंह्वयामिशक्रंपुरुहू
तमिन्द्रं॑स्वस्तिनोमघवाधात्विन्द्रः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

इन्द्रायनमः १ ॐ अग्निदूतंपुरोदधे
हव्यवाहमुपब्रुवे देवाँ आसादयादिह
अग्नयेनमः २ ॐ असियमोअस्या
दित्योऽर्वन्नसित्रितोगुह्येन व्रतेनअ
सिसोमेनसमयावि विपृक्तआहुस्तेत्रि
णीदिविबंधनानि यमायनमः ३ ॐ
एषतेऽनिर्ऋतेभागस्तंजुषस्वस्वाहा
अग्निनेत्रेभ्योदेवेभ्यःपुरःसद्भ्यःस्वा
हा यमनेत्रेभ्योदक्षिणासद्भ्यःस्वाहा
विश्वदेवनेत्रेभ्योदेवेभ्यःउत्तरासद्भ्यः
स्वाहा सोमनेत्रेभ्योदेवेभ्यः उपरि
सद्भ्यो दुवस्वद्भ्यःस्वाहा निर्ऋ
तयेनमः ४ ॐ इमंमेवरुणश्रुधी
हवमद्याचमृडय त्वामवस्युराचके
वरुणायनमः ५ ॐ वातोवामनोवा
गंधर्वाःसप्तविंशंशतेअग्निस्वाम

ग.पु. युजस्तत्रस्मिंयवमादधुः वायवेनमः
११ ६ ॐ कुविदंगयवमंतोयमचिद्यथा
दान्त्यनुपूर्वं वियुयद्देहेषांकृणु
हिभोजनानियेवर्हिषोनम उक्तिंयजं
ति कुवेरायनमः ७ ॐ नमोईशानजग
तस्तस्थुषस्पतिंधियंजिन्वमवसेहूम
हेवयम् पूषानोयथावेदसामसद्वृ
धेरक्षितापायुरदब्धः स्वस्तये ईशा
नायनमः ८ ॐ नमोऽस्तुसर्पेभ्योये
केचपृथिवीमनुयेअन्तरिक्षेयेदिविते
भ्यः अनन्तायनमः ९ ॐ ब्रह्म
यज्ञानंप्रथमंपुरस्ताद्विसीमतः सुरु
चोवेनआवः सबुध्न्या उपमाअस्य
विष्ठाः सतश्चयोनिमसतश्चवि
वः ब्रह्मणेनमः १० दक्षिणा ॐ
यथाकृतेनन दशदिक्पालपूजनसां

गनाभिब्रुह्मार्थमिदं नामं स्त्ये दैवनं यथा
नामगोत्राय ब्राह्मणाय दक्षिणा त्वाम
हं ददेत इति दशदिक्पाल पूजनम् ०
अथ ब्रह्मा पूजनम् आवाहनं ॐ ब्रह्म
ण्यशिरसा देवरष्टनेत्र चतुर्मुख मं०

गायत्रीस
हितं देवंब्र
ह्माणावाह
याम्यहम
जलगंधे
त्यादिभि
संपूज्य:
अर्घेनादे
वाधिपवि
श्वसृजेपि
तामहत्वं
चपवित्रपाणी धर्मस्थितं चैव चतुरष्ट
नेत्रं चतुर्मुखोत्वं नमस्ते दक्षिणा ॐ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स॰उ॰ द्यकृतेनलक्ष्मीविष्णोसहितब्रह्माण्डजनसांग
१२ तासिद्ध्यर्थे इदंनामं लक्ष्म्यै देवतं यथा॰
नाम॰ ब्रह्माण्डज्यनोसिद्धमस्तु अथ
विष्णुपू॰ आवाहनं ॐकेशवंपुंडरी
काक्षमाधवंमधुसूदनं लक्ष्मीस॰
हितंदेवंविष्णुमावाहयाम्यहं जल॰
गंधेत्यादिलक्ष्मीसहितविष्णवेनमः

प्रार्थना नारायणंलक्ष्मीप्रियंचकृ॰
पालोदैत्यविनाशनंच गरुडासनंवा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

हनपद्महस्तजनार्दनत्वांभगवन्नमस्ते
दक्षिणा ॐ अद्यकृतैतत् लक्ष्मीस
हितविष्णुपूजनसांगतासिद्ध्यर्थं इदं
तांम्रद्रव्यंदैवतंयथानामगोत्रायब्रा
ह्मणायदक्षिणा० ततः शिवपार्वती
सहितावाहनंकृत्वा पूज० ॐ शिवः
शंकरमीशानं द्वादशार्धार्धलोचनं
उमयासहितंदेवंशंभुमावाहयाम्यहम्
जलगंधेत्यादिबिल्वपत्रसहितंसंपूज्यः

स॰उ॰ प्रार्थना ॐ शंकर त्रिशूलपाणिं गंगाधरं चैव
१२ तु नीलकंठं उमापतिं भस्मधारी दलित्व
हे चन्द्रशेखर भवन्तं नमस्ते दक्षिणा ॐ
अद्य कृतैतत्पार्वती सहित शिव पूजन सां
गतासिद्ध्यर्थं मिदं ताम्रं सूर्य दैवतं य
थानाम गोत्राय ब्राह्मणाय दक्षिणात्वा
महं ददे तत् स्वस्ति प्रतिवचनं अथ नव
ग्रह पूजनम् ततः सूर्यावाहनम् ॐ दि
वाकरं सहस्रांशुं ब्रह्माद्यैरमरैः स्तुतं त्रि
लोकनाथं जगन्नेत्रं सूर्यमावाहयाम्य
हं किरीटिनं पद्माकारं हस्ताद्वयधृतप
द्मालोहितवर्णं रक्ताम्बरं सप्त हयरथ
स्थं सूर्यं ध्यात्वा ॐ भूर्भुवः स्वः कलिं
गदेशोद्भव काश्यपगोत्र काश्यप पुत्र सूर्य
इहागच्छ इह तिष्ठेत्यावाह्य प्रतिष्ठा
पूजां कृत्वा ॐ सं सूर्याय नमः ज

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative



लगं धेत्वादि रक्तवस्त्रेणापूजयेत प्रार्थना
ॐ पद्मासनपद्मकरो द्विबाहु पद्मद्युति
सप्ततुरंगवाहनं दिवाकरो त्रिलोकगुरुः
किरीटिमपिप्रशादं विधातु देवं नमस्का
रं कृत्वा दक्षिणा ॐ अद्य कृतैतन्सू
र्य्यग्रहदेवतापूजनसांगतासिध्यर्थं इ
दं ताम्रं सूर्य्य दैवतं यथानामगोत्राय
ब्राह्मणाय दक्षिणां अहं ददे स्वस्ति०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अथचंद्रावाहनं ॐहिमरस्मिनिशाना
थताराप्पति अमृतोद्भवं औषधीनांतु
राजानंचंद्रमावाहयाम्यहं . अग्नेयां
किरीटिनंद्विभुजंगदाहस्तं श्वेतवर्णांमृ
गरथंस्थं सोमंध्यात्वा ॐभूर्भुवःस्वः
यमुनातीरोद्भवअत्रीगोत्रसमुद्रपुत्र
इहागच्छइहातिष्ठआवाह्या ॐचंद
द्रायनमः जल गंध अक्षत पुष्प
धूप दीप श्वेतवस्त्र फल छत्र दु
ग्ध नैवेद्य सोमायनमः प्रार्थना ॐ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्वेतांबरं श्वेतविभूषणाढ्यं श्वेतद्युति

दंडकरो द्विबाहुं चन्द्रामृतात्मावरद

(कि)रीटिं श्रेयांसि मह्यं प्रददातु देव नम

स्कारं ॐ अग्निमूर्द्धाकृतेनत्सौमगृह देवता

पूजनं सांगनामिति सूर्यदेवं तं मन्त्र मूर्ध्ये

दैवतं यथा नाम गोत्राय ब्राह्मणाय दद्वि

त्वा महं ददे स्वस्ति ० अथ भौमस्यावा

हनम ॐ रुद्र स्य श्वेदं सं मन्तं लोहि

तांगं भुवचे संकुमार कूर कर्मा सां भौममा

वाहयाम्यहं दक्षिणस्यां किरीटिनं धृ

तबरीरक्त

माल्यांबरध

रं चतुर्भुजं

वरशक्तिशू

लगदा हस्त

मेषस्थं कु

जं ध्यात्वा

म॰ उ॰ ॐ भूर्भुवः स्वः अवन्तिदेशोद्भव भार
१५ द्वाजगोत्र भूमिपुत्र भौम इहागच्छ इहा
तिष्ठेत्यावाह्य ॐ अग्निर्मूर्धा इत्यावाहनमं
त्रस्य प्रश्नादि ईशान्य ऋषिः राक्षसः रक्तांबरो
रक्तवपुः किरीटिनं चतुर्भुजो मेषगमो
गदाधृक् नगधरः नृगुणःशक्तिधरः त्रिशूली
सदा नमस्त्वा वरदः प्रशांतः इति नमस्का
रं दक्षिणा ॐ अद्य कृतैतत् भौम ग्रह
पूजन सांगतासिद्ध्यर्थं इदं ताम्रं संख्ये
दैवतं यथानामगोत्राय ब्राह्मणाय द
क्षिणां त्वामहं ददे स्वस्तिप्रतिवचनम्

अथ बुधा
वाहनम् ॐ
बुधं बुद्धिप्र
दातारं सौ
मवंशप्रव
र्धनं यजमा

नमस्यहितायोयवुधमावाहयाम्यहं ६
श्यामांगाकिरीटिनंपीतवर्णपीतमाल्यांवर
धरं चतुर्भुजंवरचर्मगदाखड्ग हस्तंसिं
हस्थंवुधंध्यात्वा ॐभूर्भुवःस्वःम
ग्धदेशोद्भवअत्रिगोत्रचन्द्रपुत्र इहाग
च्छ इहातिष्ठेत्यावाह्य ॐबुंवुधायन
मः जलगंधहरितवर्णवस्त्रेत्यादिसंपू
ज्यः प्रार्थना ॐचित्राम्बरोसौमवपुः
करीटिनेचतुर्भुजेसोमसुतःसुशांतः (
खड्गीगदाचर्मवरोदधानःसिंहासनस्थो
वरदोस्तुमह्यं नमस्कारंकृत्वा दक्षिणा
ॐअद्यकृतैतन्नवुधग्रहपूजनसांगता
सिद्ध्यर्थमिदंताम्रद्रव्यंदैवतंयथाना
मगोत्रायब्राह्मणायदक्षिणांत्वामहंद
देस्वस्तिप्र० वुधग्रहपूजितोसौदत्तमस्तुः
७अथवृहस्पतिग्रहावाहनं ॐवृहस्पते

ग्र॰ उ॰
१६

तमांगिरसंदे
वतानांचगुरो
हितं पात्र
स्वमंत्रिणो
भक्त्यागुरुमा
वाहयाम्यहं
उत्तरस्यांकरी
टिनंपीतवर्णं
पीतमाल्यांवरधरंचतुर्भुजंवराक्षसूत्रं
दंडुकमंडलुहस्तंगजस्थं गुरुं ध्यात्वा
ओंभूर्भुवःस्वःसिंधुदेशोद्भवआंगिरस
गोत्रब्रह्मपुत्रगुरोइहागच्छइहतिष्ठे
त्यावाह्य ओंवंबृहस्पतयेनमः जल
गंधाक्षतपुष्प-पीतवस्त्रेत्यादिगुरवेन
मः ० प्रार्थना ओंपीतांवरपीतवपुः
करीटिनंचतुर्भुजंदेवगुरुंप्रशांतः द
धातिदंडंचअक्षकमंडलुतथाक्षसूत्रंव

रक्षोस्तु मह्यं नमस्कारं दक्षिणां ॐ
अद्यकृतैतन्नवग्रहस्थापितग्रहेपूजनसांग
तासिद्ध्यर्थं इदं ताम्रं रूप्यं दैवतं यथा
नामगोत्राय ब्राह्मणाय दक्षिणां त्वामहं
ददे स्वस्ति ॥० अथ शुक्रस्यावाहनं प्र
विप्यजठिरे यो भो निष्क्रांतवहिरद्वि
तं पुरोहितं च भृगुसूरिं तं शुक्रमावाह

याम्यहम्
एवं ध्यायेत्क
रीटिनं श्वेत
वर्णं श्वेतमा
ल्यांवरधरं
चतुर्भुजं व
रदहस्तं
कमंडलुह
स्तं श्वेताश्वरथस्थं शुक्रं ध्यात्वा ॐ भू
र्भुवः स्वः भोजकटदेशोद्भवः भार्गव
गोत्र भृगुपुत्र शुक्र इहागच्छ इह तिष्ठ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰उ॰ त्यावाह्य ॐ शुंशनैश्चरायनमः जलगं

८ धेत्यादि॰ प्रार्थना श्वेतांबरः श्वेतवपुः

किरीटिनं चतुर्भुजो दैत्यगुरुः प्रशांतः त

थाक्षसूत्रंचकमंडलुंचजयंचविभ्रद्वर

दोस्तुमह्यं नमस्कारं ॐ अश्वकृतेन

तभृगुसेहृदेवताप्रजनसांगनाभिहृद

येऽदंतानस्त्र्यैदैवतंयथानामगो

त्रायश्राह्यएायदहिएात्वामहंददेस्व॰

अथशनिआवाहनं प्रदीप्तवह्निभिन्नाभं

भिन्नांजन

समप्रभम्

छायामा

र्तंडसंभू

तंशनिमा

वाहयाम्य

हम् प

श्चिमायांकिरीटिनंहृस्ववर्णींकृत्स्नमा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्योवरधरं चतुर्भुजं त्रिशूलधनुर्वाण

पाणिमहिषास्थं शनैश्चरं ध्यात्वा ॐ

भूर्भुवः स्वः सिन्धुदेशोद्भवः पैठीनस

गोत्ररुद्रपुत्र सौराष्ट्रदेशोद्भवः काश्य

पगोत्र सूर्यपुत्र इहागच्छ इहातिष्ठ

स्वाहा ॐ शं शनैश्चराय नमः ज

लं गं धेत्यादि० प्रार्थना नीलद्युतिशू

लधरं किरीटिनं महिषस्थं सकलोध

नुषाण सूर्यसुतं प्रशांतमंद सुगामी

वरदोस्तु मह्यं ॐ मध्यकृतेन तुल्यानि

स्नेहहजनसांगतासिद्ध्यर्थमिदं तामं सूर्य

दैवतं यथानामगोत्राय ब्राह्मणाय ददि

गात्वाम

हं ददेत

स्वस्ति १०

ॐ अथ राहु

ध्यावाह

नमः कृ

स.उ. सेनचक्रच्छेदेन छिन्नग्रीवं महाबलं ।
१८ सिंहिकेयं महाकायं राहुमावाहयाम्यहं
नैऋत्यां धूम्रवर्णं कुलमाल्यांबरधरं का
लवदनं चतुर्भुजं वरखड्गत्रिशूलचर्महस्तं
मत्स्यवाहनं राहुं ध्यात्वा ॐ भूर्भुवः स्वः सौ
राष्ट्रदेशोद्भवः पैठीनसगोत्र ब्रह्मपुत्र राहु इ
हागच्छ इहातिष्ठेत्यावाह्य ॐ रां राहवे नमः
जलगंधेत्यादि ॥१०॥ छागबलि राहवे नमः
प्रार्थना नीलांबरो नीलवपुः किरीटी का
लवक्त्रकरवालशूली चतुर्भुजश्चर्मधरस्तु रा
हुमत्स्यवाहनवरोस्तु मह्यं ॐ अर्धकू
नैननराहुर्मे हरदुर्जनसंगतानि सिद्धार्थेनामह ॥१०॥

अथ केतु
आवाहनं
धाह्मराकु
लसंभूतं
रक्तलोका
महाबलं ।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्रेष्ठं त्वं च महात्मानं केतुमावाहयाम्यहम् (
वायव्यां करीटिनं धूम्रवर्णो द्विभुजं वरद
गदाहस्तान्विकृताननस्त्वान् सिंहरथस्थं के
तुं ध्यात्वा ॐ भूर्भुवः स्वः पूर्वदेशोद्भवं पै
ठीनसगोत्र ब्रह्मपुत्र इहागच्छ इहतिष्ठे
त्यावाह्य ॐ कं केतवे नमः जलं गंधेत्या
दि पूजयेत् दक्षिणा ॐ अद्य कृतैतन्न
केतुग्रहपूजनसांगतासिद्ध्यर्थमिदं ताम्र
सूर्य दैवतं यथानामगोत्राय ब्राह्मणाय
दक्षिणात्वां अहं ददे तेन स्वस्ति प्र० प्रार्थना
धूम्रो द्विबाहुर्वरदो गदाभृत् सिंहारथस्थो
विकृताननश्च करीटकेयूरविभूषितांगः
सदास्तु मे केतुगणः प्रशान्तः नमस्कारं
कृत्वा अथ नवग्रह प्रार्थना ॐ ब्रह्मा
मुरारि त्रिपुरान्तकारि भानुः शशी भौम
सुतो बुधश्च गुरुश्च शुक्रः शनिराहुकेतुः स
र्वे ग्रहाः शान्तिकरा भवन्तु इति नवग्रहपूजनं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.उ. अथकलशस्थापनमावाहनंपठेत अथा
१९ तः संप्रवक्ष्यामिकलशसंभवोयथा हिम
वदुत्तरेपार्श्वेक्षीरोदाख्येमहासागरे अमृतमं
थनेतत्रदेवदानवपन्नगैः संहृष्टैश्चैव समु
त्पन्नंकलशंसर्वतीर्थकं सर्वपापप्रशमनं
स्थापितंब्रह्मणापुरा कलशेसर्वदेवानां
सुखदंसर्वकामिनां श्रेयसेचसमुत्पन्नं
विश्वाक्षेत्रवल्लभं सृजंतेविश्वरूपत्वं
कलशंकामरूपिणं कलशेकत्रदेवानां
दानवानांतथैवचः निर्मितोयंपुरासर्वक
लशस्तेनउच्यते कलशस्यमुखेविष्णु
र्ग्रीवायांवृषभध्वज मूलेतस्यस्थितोब्र
ह्मामध्येमातृगणास्मृता कुक्षौचसागरा
सप्तसप्तद्वीपाचमेदिनी अर्जुनीगोमतीचै
वचन्द्रभागासरस्वती कावेरीकृष्णवेणा
चगंगाचैवमहानदी तापीगोदावरीचैव
नर्मदाचमहानदी विद्यापादाचयेस्रो

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

छमाश्रीपर्वतविनिर्गता प्रभासं पुष्करे चैव नै
मिषं च हिमालयं सरित्त्रिपंचकं चैव गंगा
सागरसंभवं पृथिव्यां यानि तीर्थानि कल
शे तानि विन्यसेत् अत्र शांतिश्च पुष्टिश्च
गायत्र्या च विशोधनः अरुंधती च समाख्या
तानथा देवि सरस्वती ऋग्वेदयजुर्वेदौ
सामवेदो ह्यथर्वणः चतुर्दिक्षु संस्था
प्य कलशं विधिपूर्वकं तत्फलं समवा
प्नोति कलशोत्पन्नकीर्तिनां ब्राह्मणोल
भ्यते विद्यां पार्थिवो लभ्यते महीं वैश्यो
लभ्यते लाभं शूद्रस्य गतिमुत्तमम् रोगा
र्तो मुच्यते रोगात् आरोग्यं श्रेयमाप्नुयात् (
आयुरारोग्यमैश्वर्यं लभेत्कामांश्च पुष्क
लान् संस्थितं कलशं दिव्यं गंगातोयेन पू
रितम् पंचरत्नसमायुक्तं स्वेतवस्त्रेण गुं
ठितं एवं कुर्यात् यदा जीवः शांतिकाले ष
नियमः सर्वं सुखमवाप्नोति नात्र का

स॰उ॰ ध्येविचारितां पूर्णकलशाइहागच्छइ
२० हातिष्ठेत्यावाह्य जलगंधेत्यादिभिसं
पूज्यः पंचपल्लवंसंस्थाप्य प्रार्थना॰
ब्रह्मणानिर्मितंत्वंहिमंत्रास्थाप्यसतोप
मे प्रार्थयामिचत्वंकुंभवांछितार्थंदद
स्वमे ॐपूर्णघोषाः पूर्णसंकाशापूर्णा
श्चैवमनोरथाः पूर्णकुंभप्रसादेनसर्वेसि
द्धिर्भविष्यति लंकायांदक्षिणेद्वारेकुंभ
योनिःनमोस्तुते इतिप्रार्थना अथद
क्षिणा ॐअद्यकृतैतत्पूर्णकलश
पूजनसांगतासिद्ध्यर्थमिदंताम्रमूल्यं
दैवतेयथानामगोत्रायब्राह्मणायदक्षि
णात्वामहंददेस्वस्तिप्र
तिवचनं पूर्णकलश
पूजितोसीत्समस्तुः इति
कलशपूजनम्
अथमत्स्यनारायणप्रति

पूजन सत्यनारायणप्रतिमांताम्रपात्रे
संस्थाप्य पश्चात्पूजनंकृत्वा पंचामृ
तेनस्नापयेत्पयोदधिघृतंमधु शर्क
राचसंयुक्तै तत्स्नानार्थंमंत्रमाह प्र
थमजलं ॐवरुणस्योत्तंभनमसि व
रुणस्यस्कंभसर्ज्जनीस्थो वरुणस्यऋत
सदन्यसि वरुणस्यऋतसदनमसि
वरुणस्यऋतसदनमासीद अथ
दुग्धं ॐपयःपृथिव्यांपयओषधी
षुपयोदिव्यंतरिक्षेपयोधाः पयस्व
तीःप्रदिशःसंतुमह्यम् पुनःजलं
वरुणस्येति० अथदधि ॐदधिक्रा
व्णोअकारिषंजिष्णोरश्वस्यवाजिनः
सुरभिनोमुखकरत्प्रणआयूंषितारि
षत् इतिदधि पुनःजलंवरुण
स्येति० अथघृतं ॐघृतवतीभुवना

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म.उ. नाममिश्रियोविष्टव्योमधुहृग्येनमर्प
२१ समापाद्यावापृथिवीवरुणास्यधर्मणा
विष्कुमिरे अजरे मूरिरेनसाः इतिघृ
तं पुनःजलं वरुणस्येति० अथमधुः
ॐमधुवाता ऋतायतेमधुक्षरंतिसिंध
वामाध्वीनेसंत्वोषधीमधुनक्तमुतोष
षसोमधुवत्पार्थिवं रजमधुद्यौर
स्तुनपितामधुमान्नोवनस्पतिर्मधुमा
अस्तुसूर्योमाध्वीर्गावोभवंतुनः इति
मधुः पुनःजलं वरुणस्येति० शर्करा
ॐविंस्मोरराटमसिविस्नोःस्नप्त्रेस्थो
विस्नोःस्यूरसिविस्नोर्ध्रुवोसिवैस्नव
मसिविस्नवेत्वा इतिशर्करा पुनः
जलं वरुणस्येति० इतिजलं पुनः
गंगाजलं ॐगंगेचयमुनेचैवगोदा
वरीचसिंधुसरस्वतीनर्वदेसिंधुपुष्क
रकावेरी गंगास्नानंकरोम्यहं इति

गंगाजलस्नानं पुनः पञ्चामृत एक
त्रस्नानं पंचामृतेनमयादत्तंपयोदधिघृ
तेमधुःशर्करयाचसंयुक्तं स्नानार्थंप्रति
गृह्यतां इतिएकत्रपञ्चामृतस्नानं ॥
अथमकलिकर्म ॐतच्चक्षुर्देवहि
तंपुरस्ताच्छुक्रमुच्चरत्पश्येमशरदः
शतंजीवेमशरदःशतंशृणुयाम
शरदःशतंप्रब्रवामशरदःशतमदी
नास्यामशरदःशतंभूयश्चशरदः
शतात् इतिमकलिकर्म एतंनेतिप्र
तिष्ठाकुर्यात् अथध्यानं ॐध्या
येत्सत्गुणातीतंगुणत्रयसमन्वितं।
लोकनाथंत्रिलोकेशंकौस्तुभाभर्णं
हरिंनीलवर्णंपीतवस्त्रं शंखचक्र।
गदाधरं गोविंदंगोकुलानंदंगजा।
वक्त्राच्छिन्नस्वयं इतिध्यानं अथआ
वाहनं अआगच्छागच्छदेवेशतेजोरा

ग

स.उ. जगत्पते: क्रियमाणांमयापूजांगृह्णा
२२ ण सुरसत्तम: इतिआवाहनं अथ
आसनं नानारत्नसमायुक्तंकीर्तिस्वर
विभूषितं आसनंदेवदेवेशप्रीत्यर्थं
प्रतिगृह्यतां इतिआसनं अथपाद्यं
नारायणनमस्तेस्तुनर्कार्णवतारकं
अर्घ्याचमनीयंमयादत्तंगृह्णाणपुरु
षोत्तम: इतिपाद्यं अथअर्घ्यं व्यक्ता
व्यक्तस्वरूपायहृषीकपतयेनम: मया
निवेदितंभक्त्याअर्घ्योयंप्रतिगृह्यतां
इतिअर्घ्यं अथपट्टवस्त्रं नारायण
नमस्तुभ्यंनर्कार्णवतारकं त्रैलोक्य
व्यापकानंत त्राहिमांभक्तिवत्सल:
इतिपट्टवस्त्रं अथयज्ञोपवीतं नारा
यणनमस्तेस्तुत्राहिमांभक्तिवत्सल:
ब्रह्मसूत्रंचोत्तरीयंगृह्णाणपुरुषोत्त
म: इतियज्ञोपवीतं अथगंध श्रीखं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

डं चंदनं दिव्यगंधाढ्यं सुमनोहरं विले
पनं सुरश्रेष्ठ चंदनं प्रतिगृह्यतां इति गंध
अथ जवादनं रजितान् चंदनेरक्तान् ज
वानस्तु सुशोभवान् गृहंतु मम संतुष्ट
प्रशन्न देवपुंगवः इति जवादनं अथ तु
लसीदलं तुलस्यां मृतनामासि सदात्वं
केशवप्रिये करोमि विष्णु पूजायां वरदा
भव शोभने इति तुलसीदलं अथ पुष्पं
पुष्पैर्नानाविधैश्चैव पूजितः पुरुषोत्तमः
पुष्पं गृहाण देवेश दिव्य सुगंधि मनो
हरं इति पुष्पं अथ माल्य माल्यादी
नि सुगंधानि मालत्यादि निवैप्रभो म
याहृतानि पूजार्थे पुष्पाणि प्रतिगृह्य
तां इति माल्य अथ धूप वनस्पतुद्भवो
धूपो गंधाढ्यो गंध उत्तमं आघ्रेयः स
र्वदेवानां धूपोयं प्रतिगृह्यतां इति धूपं
अथ दीपं आज्यं च वर्ति संयुक्तं वह्निना

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स॰पु॰ योजितंमया दीपंगृहाण देवेशत्रैलोक्यति
२२ मरापहं इतिदीपं अथपुंगीफलंश्रीफलं॥
इदंफलंमयादेवस्थापितंपुरतः स्तव तेन
मेसफलावाप्तिर्भवेज्जन्मनिजन्मनि इतिपुं
गीफ॰श्रीफ॰ अथनैवेद्यं घृतपक्वंहवि
ष्यान्नंपायसंसरकरान्वितं नानावि
धंचनैवेद्यं विष्णोमेप्रतिगृह्यतां इतिनै
वेद्यं अथआचमनं सर्वपापहरंदि
व्यंगांगेयंनिर्मलंजलं आचमनंमया
दत्तंगृह्यतांपुरुषोत्तमः इतिआचमनं
अथतांबूलं लवंगकर्पूरयुक्तंतांबूलं
सुरपूजितं प्रीत्यागृहाणदेवेश ममसौ
ख्यविवर्धय इतितांबूलं अथनीरा
जनं चतुर्वर्तिसमायुक्तंघृतेनचसुपू
रितं नीराजनेनसंतुष्टोभवत्वेवजग
त्पतिः इतिनीराजनं अथप्रदक्षिणा
यानिकानिचपापानिजन्मांतरकृतानि
च तानितानिविनश्यंतिप्रदक्षिणापदे

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पत्रे १८ ततः पुष्पाञ्जलिं नमस्कारं स्तुत्वा कृत्वा स्तुवीत यन्मया भक्तियुक्तेन पत्रं
पुष्पं फलं जलं निवेदितं च नैवेद्यं तद्गृ
हाणानुकंपया १ मंत्रहीनं क्रियाहीनं
भक्तिहीनं जनार्दन यत्पूजितं मया देव
परिपूर्णं तदस्तु मे २ अमोघं पुंडरीका
क्षं नृसिंहं दैत्यसूदनं हृषीकेशं जगन्ना
थं वागीशं वरदायकं ३ गुणत्रयं गुणा
तीतं गोविंदं गरुडध्वजं जनार्दनं जना
तीतं जानकीवल्लभं हरिं ४ प्रणमा
मि सदा भक्त्या नारायणमतः परं दुर्गमे
विषमे घोरे शत्रुभिः परिपीडिते ५ नि
स्तारयस्व सर्वेषु तथा निष्टभयेषु च
नामान्येतानि संकीर्त्य ईप्सितं फलमाप्नु
यात् ६ सत्यनारायणं देवं वंदेहं का
मदं प्रभुं लीलया वितनं विश्वं येन तत
स्मै नमो नमः इति पुष्पाञ्जलि० एवं पूज
नं ते पश्चात्कथां श्रुत्वा चन्द्रायार्घं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स॰उ॰ २८

दद्यात् इति रात्रिकृत्यविधानं अथ प्रा-
तःकृत्यविधानं प्रथमं स्नानादिकं कृ-
त्वा संध्यां कुर्यात् ततः प्रतिज्ञासंक-
ल्पं कार्येत ॐ अद्येतस्य शुभमासे
ऽमुकमासे ऽमुकपक्षे ऽमुकतिथौ ऽमु-
कवासरे ऽमुकनक्षत्रे यथायोग्यकर्म-
मुहूर्त्ते मह शुभे अतिस्तुति पुरणोक्ते
फलप्राप्तिकामः मम मनोभिलाषसिद्ध्यर्थे
श्रीसत्यनारायण उद्यापनः सय्यादि
दानं गोदानं इत्यादि दानमहं करिष्ये :
इति संकल्पः अथ शय्यादान ॐ सो-
पकरणेभ्यो शय्यायै नमः वेरा ३ द्विज
दंपति ब्राह्मणेभ्यो नम ३ इमां सोप-
करणेभ्यो शय्यां दानं ददामि ब्राह्मणो व्रू-
(ब्रू)यात् ददस्व इति द्विजकरे जले(
दानं ॐ अद्या ऽमुकमासे ऽमुकपक्षे
ऽमुकतिथौ वऽमुकवासरे यथायोग

कर्मणोमुहूर्तैसहभुक्तेस्मिन्निस्मृतिपुराणो
क्तफलवाप्तिःकामः इमांसोपकरणीं
सशय्यांविष्णुदैवतांऽमुकगोत्रायामुक
शर्मणेब्राह्मणायतुभ्यमहंसंप्रददे
दक्षिणा ॥ ॐअद्यकृतैतत्सोपकरणस
य्यादानप्रतिष्ठार्थमिदंताम्रंसद्रव्यंदै
वतंऽमुकगोत्रायऽमुकशर्मणेब्राह्म
णायदक्षिणांतुभ्यमहंसंप्रददे
स्वस्तिप्र० ॥ प्रार्थना ॥ यथाकृष्णस्व
दीयाहिप्रस्यन्यादीरसागरे शय्या
तथास्यस्यान्ममजन्मनिजन्म
नि ॥ सोपकरणीव्यजनलष्टिकासहि
तच्छत्रायनमः३ ब्राह्मणायनमः३
इमांसोपकरणीव्यजनलष्टिकासहि
तच्छत्रदानेददानिददस्व० ॐअद्य
ऽमुकगोत्रस्यश्रीमन्नारायणप्री
तयेकामः इमांसोपकरणीव्यजनं
वायुदैवतांलष्टिकांवनस्पतिदैवतां

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स. उ.
२५
इदं छत्रं इन्द्रदैवतं ऽमुकगोत्राय ऽमु
कशर्म्मणे गोत्रां ब्राह्मणायतुभ्यमहं संप्रद
दे स्वस्तित्युक्त्वा ० दक्षिणा ॥ ॐ अद्यकृ
तैतद्व्यजनलक्षिकासहितच्छत्रदान
प्रतिष्ठार्थं इदं नानासरूपदैवतं यथा
नाम गोत्राय ब्राह्मणाय दक्षिणां तुभ्य
महं ददे । स्वस्ति ० छत्र ॥ प्रार्थना ॥
इहामुत्रोतपत्राणां कुरुते नरसप्रभो
छत्रत्वत्प्रीतये दत्तं ब्राह्मणाय मया
शुभं ॥ व्यजन ॥ जोर्थना ॥ सोमो द्वा
निरूपाणि जातवेदश्चमारुतः त
स्माद्देषां प्रदानेन सांतिर्भवतु सर्वदा
सोपकर्णी उपानयद्युग्मं नमः ३ प्राण
३ इमां सोपकरणौ उपानयद्युग्मं दानं
ददानि ददस्व ॐ अद्य ऽमुकगो
त्रस्य श्रीमत्यनारायणप्रीतये कंचका
दिभयनिवारणार्थे इमे उपानहौ
त्रानं गिरेर्दैवतं यथा नाम गोत्राय

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ब्राह्मणाय तुभ्यमहं संप्रददे स्वस्ति॰
।दक्षिणा।। ॐ अद्य कृतैतदुपानद्दान
प्रतिष्ठार्थमिदं नामंद्रव्यं दैवतं यथा
नाम गोत्राय ब्राह्मणाय दक्षिणां तु-
भ्यमहं ददे न । पाठेन।। उपानहौ प्रय
स्वामिकंटकादि निवारणे परित्राणाय।
यते विप्र गृह्याण त्वं सुखाय च।।अ
द्भुजलेन हस्तौ पादौ प्रक्षाल्य गं गावि
ष्णो हरि आचम्य ततः सोपकरणे
जलपात्र सान्नभोजनपात्राभ्यां नमः
२ वा॰ २ इमौ सोपकरणे जलपात्र
सान्नभोजनपात्र दाने ददानि इदं स्व॰
ॐ अद्यऽमुकगोत्रस्य श्रीसत्यनाराय
णप्रीतये इमौ सोपकरणे जलपात्र
सान्नभोजनपात्रे वह्निदैवतौ यथा
नाम गोत्राय ब्राह्मणाय तुभ्यमहं संप्र
ददे स्वस्ति तुष्का। दक्षिणा। ॐ अद्य कृ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स॰उ॰
२६

नैतत्तुलपात्रसान्नभोजनपात्रदानप्रति
ष्ठार्थमिदं नामं ऽकेदैवतांयथानामगोत्रा
यब्राह्मणायदक्षिणांतुभ्यमहंसंप्रददे ॥
प्रार्थना कमंडलुजलपूर्णीवेदत्रयम
येशुभं प्रीयतांधर्मराजेनदानेना
थेपश्यद: ॥ ॐसोपकरणीनानावर्ण
रंजितद्विजदंपतिपरिधानियवासं
भ्योनम: ३ प्रा॰ ३ इमांसोपकरणीनां
नारंजितद्विजदंपतिपरिधानियवासां
सिदानं ददानि ददस्व॰ ॐअद्यामु
कगोत्रस्य श्रीसत्यनारायणप्रीतये इ
मांसोपकरणीं द्विजदंपतिपरिधानवा
संसिबृहस्पतिदैवतांयथानामगो
त्रायब्राह्मणायतुभ्यमहंसंप्रददे द
क्षिणा ॥ ॐअद्यकृतैतत्द्विजदंपतिप
रिधानीयवासांसिदानप्रतिष्ठार्थमि
दंनामंरूप्यदैवतांयथानामगोत्राय
ब्राह्मणायदक्षिणांतुभ्यमहंसंप्रददे।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रार्थना। स्थापनं सर्वलोकानां लज्जापा
लनं परं ॥ सुवेष्टधारिवस्त्रं त्वं मत्र
शांतिं प्रयच्छमे नमस्कार० ॐ सोप
करीं सौभाग्यवस्तुसहितसौभाग्यभा
जनाय नमः ३ प्रा० ३ इमां सोपस्करीं
सौभाग्यवस्तुसहितसौभाग्यभाजन
दाने ददानि इदस्व० ॐ अद्य ऽमुक
गोत्रस्य श्रीसत्यनारायणप्रीतये इ
मां सोपकरीं सौभाग्यवस्तुसहितसौ
भाग्यभाजनं विष्णुदैवतं यथानाम
गोत्राय ब्राह्मणाय तुभ्यमहं ददे न ॥ स्वस्ति०
दक्षिणा ॥ ॐ अद्य कृतैतत्सौभाग्यभा
जनदानप्रतिष्ठार्थं इदं तांबं ऽकेदैव
तं यथानाम गोत्राय ब्राह्मणाय तुभ्य
महं ददे न प्रार्थना। रत्नं वस्त्रं सुगंधं
[illegible] यस्माद्धादित्यस्य समप्रभं ग्रद
दानस्यास्य सर्वपापेभ्यो रक्षतु ॥

स॰उ॰ सोपकरणे इस्त्रीपुरुष धार्जित हेमार जि
२ तघटित अलंकरणम् घणो मेनम: ।
३ ब्रा॰ ३ इमां सोपकरणां इस्त्रीपुरुष ।
धार्जित हेमार जित घटित अलंकरणं
मुघणां दानं ददानि ददस्व॰ ॐ अ
द्य अमुक गोत्रस्य श्रीसत्यनारायणप्री
तये इमां सोपकरणां हेमार जितअलं
करणां निर्वेन्द्रूवद्धि दैवतं यथानामगो
त्राय ब्राह्मणाय अहं ददे स्वस्ति ॐ॰
दक्षिणा ॥ ॐ अद्यकृतैतत् इस्त्रीपुरु
ष धार्जित हेमार जित अलंकरणं मु।
घणां दान प्रतिष्ठार्थे मिदं ताम्रं सूर्य
दैवतं यथानामगोत्राय ब्राह्मणाय।
दक्षिणां तुभ्यमहं ददे तेन प्रार्थना ॥
हिरण्यगर्भसंभूते सौवर्णे चांगुली
यकं धर्मवर्द्धन यस्मात् मितिश्रीणां तुक
मलापति सोपकरणकाष्टामनकाष्ट

पादुकाभ्यां नमः ३ ब्रा० ३ इमौ सोप
करणौ काष्ठासनकाष्ठपादुके दानं दद्दा
नि दद्देख० ॐ अद्यामुकगोत्रस्य
श्रीमन्नारायणप्रीतये इमौ सोप
करणौ काष्ठासनकाष्ठपादुकौ वनस्प
तिदैवतौ यथानामगोत्राय ब्राह्मणा
याहं ददे त्व दक्षिणा ॐ अद्यकृतैत
त्काष्ठासनकाष्ठपादुकादानप्रतिष्ठा
र्थमिदं नाम नमः देवताय यथानाम
गोत्राय ब्राह्मणाय तुभ्यमहं ददे त
प्रार्थना ॥ कंटक कंटपापाणादेः स्त्रि
कादि निवारिणी पादुके शरणं यत्ताभिवि
प्रप्रीत्यानुगृह्णानाम ॥ सोपकरणपा
कपात्रपाकोपयोगिपात्रतैजसपात्रद
र्विपात्रनानापात्रेभ्यो नमः ३ ब्रा० ३
इमौ सोपकरणौ पाकपात्रपाकोपयो
गिपात्रतेजसपात्रदर्विपात्रनानापा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म.उ. त्राणिदानंददानि ददस्व० ॐ अद्यऽ
२८ मुकगोत्रस्य श्रीमत्यनारायणप्रीतये
इमांसोपकरणींपाकपात्रपाकोपयोगि
पात्रतेजसपात्रदर्विपात्रनानापात्रा
णिचवन्हिदैवतंयथानामगो
त्रायब्राह्मणायतुभ्यमहंददेत दक्षिणा
ॐ अद्यकृतैतत्पाकपाकोप
योगितेजसदर्विपात्रनानापात्रदान
प्रतिष्ठार्थमिदंतांमंरूप्यंदैवतंय
थानामगोत्रायब्राह्मणायदक्षि
णांतुभ्यमहंददेत ॥ प्रार्थना ॥ यानि
पापानिघोरेनेकानिकर्माणिस्यानिकृता
नानिच नानापात्रप्रदानेनतानि
नानिनश्यंसर्वदा ॥ ॐ सोपकरणीकला
यंत्रसहितनमालधनपात्रायनमः
३ श्रो०३ इमांसोपकरणींकलायंत्र
सहितनमालधनपात्रंदानंददानि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ददस्व० ॐ अद्येहाऽमुकगोत्रस्य श्री
सत्यनारायणप्रीतये इमां सोपकरणं
कलशं त्रावरुणावह्निवनस्पतिवा
युदैवतं यथानामगोत्राय ब्राह्मण
ायतुभ्यमहं ददेत् ॥ स्वस्ति० ॥ दक्षि
णा ॥ ॐ अद्य कृतैतत्कलशंत्रदान
प्रतिष्ठार्थमिदं नाम्नेऽके दैवतं य
थानामगोत्राय ब्राह्मणाय दक्षि
णां तुभ्यमहं ददेत् ॥ ॐ सोपकरणशि
विकायनमः ३ ब्राह्मणा० ३ इमां
सोपकरणां शिविकादानं ददानि दद
स्व० ॐ अद्याऽमुकगोत्रस्य मम कृ
त्सत्यनारायणव्रतोद्यापनतत् श्री
सत्यनारायणप्रीतये इमां सोपकरणां
शिविकां विश्वकर्मा दैवतां यथाना
मगोत्राय ब्राह्मणाय तुभ्यमहं ददेत्
स्वस्ति० दक्षिणा ॥ ॐ अद्य कृतैतच्छि

स० उ० विकादानप्रतिष्ठार्थमिदंनामंऽकेदैव
२९ तोयथानामगोत्रायब्राह्मणायतुभ्य
महंसंप्रददे ॥प्रार्थना॥ भुविलोकेस्वर्वे
जातमकलानेद्दद्वायके गायत्रादिदक्षी
घ्रहनिनेकथ्याद्यंतकरंत ध्या मनु
जानोभवेरंभ्यजनंप्रतिगृह्यवर्हम
ज्ञस्यतुप्रीतिदानेनप्रसीदंत्वयसुरो
गणा ॥ ॐसोपकरणंघट्टरसमन्वहर
न्नदानेभ्योनमः ३ ब्राह्म० ३ इमं
सोपकरणंघट्टरसमन्वहरन्नदानं
ददानि ददस्व० ॐअद्येत्यादिमुकगो
त्रस्यश्रीसत्यनारायणप्रीतये इमं
सोपकरणंघट्टरसमन्वहरन्नदानं
प्रजापतिदैवतंयथानामगोत्राय
ब्राह्मणायतुभ्यमहंसंप्रददे ॥दानप्र
तिष्ठा॥ ॐअद्यकृतैतत्घट्टरसमन्
वहन्नदानप्रतिष्ठार्थमिदंनामंऽकेदै
वतंयथानामगोत्रायब्राह्मणायतु

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भ्यमहंददेन॥ आर्षेना॥ अन्नमेवपरंल
क्ष्मी अन्नमेवजनार्दनः अन्नमेवऽ
खिलं अश्नामस्तुमेमन्नजन्मनि॥ ॐ
सोपकरणसामग्रीसहितपटमेडुपा
यनमः ३ आ० ३ इमां सोपकरणां सा
मग्रीसहितपटमेडुपदानंददानि
ददस्व० ॐ अद्यऽमुकगोत्रस्य श्री
मन्नारायणप्रीतये इमां सोपक
रणीं सामग्रीसहितपटमेडपं विष्णु
रूपदैवतं यथानामगोत्राय ब्राह्म·
णाय तुभ्यमहंददेन॥ दानप्रतिष्ठा॥
ॐ अद्यकृतैतत्पटमेडपदानप्रतिष्ठा
र्थं इदं ताम्रस्यै दैवतं यथानामगो
त्राय ब्राह्मणाय तुभ्यमहंददेन॥
अथ अश्वदान॥ ॐ सोपकरणोऽश्वच
तुरूपादेवचतुर्वेदाय·वा·चतुर्युगेभ्यो
नमः अश्वेणोऽश्विनीकुमारेभ्यो नमः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पृष्ठेयमायनमः शिरसिवरुणेभ्योन-
मः ललाटेगणेशायनमः उदरेपृथि
व्यैनमः हृदेवरुणायनमः जिह्वास
रस्वतीभ्योनमः रोमकूपेऋषिभ्यो
नमः दक्षिणकुक्षेधर्मराजायनमः
वामभागेवरुणायनमः स्रुवमध्येगं
धर्वायनमः स्रुवाग्रेपन्नगेभ्योनमः
स्रुवदक्षिणभागेऽप्सरोगणेभ्योनमः
स्रुवपूर्वभागेऽग्नयेनमः हुंकारेच
तुर्वेदायनमः समस्तरोमकूपेषुसि
द्धेभ्योनमः इतिअंगपूजा॥ ॐअद्य
ऽमुकगोत्रस्य श्रीसत्यनारायणप्री
तये इमां ऽस्रुवं सुवर्णरजितऽलं-
कारसंयुक्तं सर्वरत्नोपशोभितं व-
ज्रनेत्रनामुकुटौ हेमपुच्छ सुवास-
र्णगंधाद्यर्चितामकलदोषहननम-
इमां ऽस्रुवं गंधर्वदैवतांयथानामगो-

CC-0.Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

त्रायब्राह्मणायतुभ्यमहंददेत दक्षिणा
ॐअद्यकृतैतत्सम्प्रदानप्रतिष्ठार्थमिदं
नानाद्रव्यदैवतंयथानामगोत्रायब्रा
ह्मणायतुभ्यमहंददेत आर्घेनादेवा
नांदानवानांचगंधर्वाणांचमानुषं
युद्धार्थेवकल्पितंयानानारत्यैपुत्रप्रश्री
दमे॥अथमहिषीदान॥ॐसोपकर्णे
महिषीचतुरश्रेचतुरंगेभ्योनमः
मध्येयमायनमः पृष्ठेचित्रगुप्ताय
नमः स्तनेचतुःसमुद्रेभ्योनमः शृंगे
कामकालायनमः हृदयेधरित्रीनमः
रोमकूपेभूतेभ्योनमः ॐअद्यश्री
मत्स्यनारायणप्रीतिकामइमांमहि
षींसुपयोधरांसुवर्णशृंगांखुरस्वो
ष्णिकांप्रथमप्रसूतांतरुणीमहिषी
सुशीलांदोषसर्ववर्जितांसुवर्णति
लकांहेमघंटांसर्वालंकारसंयुक्तांम

स·उ· ३१

ह्निषीयमंदैवतांयथानामगोत्रायब्रा
ह्मणायतुभ्यमहंसंप्रददे॥दक्षिणा॥ॐ
अद्यकृतैतत्महिषीदानप्रतिष्ठार्थं
इदंताम्रंऽग्निदैवतंयथानामगोत्राय
ब्राह्मणायतुभ्यमहंसंप्रददे॥स्वस्ति०
वाचेना॥धर्मराजस्यसाहाय्येयस्य
पुत्रप्रतिष्ठितः महिषीरूपरस्यजन
नीयासास्तुवरदोमम॥अथगोदा
ने॥ॐसोपस्करांगांब्रह्मणेनमः३ब्रा०३
ॐसोपस्करांगोदानं ददानि ददस्व०
ॐअद्यमासोत्तमेमासेऽमुकमासेऽ
मुकपक्षेऽमुकतिथौवमुकवासरे
ममात्मोपकरणसंपूर्णायाऽमुकगो
त्रऽमुकनामाहंकृतस्यनारायणप्री
व्रतोद्यापनकामश्रुतिस्मृतिपुराणो
क्तफलप्राप्तिकामःपुरस्सरविविधदु
रितदोषभोग्यदुःस्वप्नदुर्मितदुर्दैवो

राम· ३१

न्नपानकृत्यादुःखरोगशोकदारिद्र्यदोषस्य
शांतिस्समकालेहिकपरमसुखभोगा।
स्यदशारिराशेज्यराज्यैश्वर्यतेजोवृद्ध्यु
न्नरसर्वत्रभोगेरोमममसंरक्षणवर्षेसह।
स्राब्धि विष्णुलोकवासकामश्रीय।
न्नपुष्टेगोविंदप्रीत्यर्थेच इमांमथ्याम
न्यालंकृतांस्वर्णशृंगांरौप्यखुरांता।
म्रपृष्ठींपात्रद्वयान्वितांवस्त्राच्छादि
तांघंटाभंडितांमुक्तालांगुलभूषि।
तांसुपूजितांसवत्सांगांरुद्रदैवतांय
थानामगोत्रायब्राह्मणायतुभ्यमहं
संप्रददे॥ सपुच्छंजलंद्विजेकरेदद्यात्
विस्तारस्तुवैकल्पजनेवानपेणांगोदानप्र
कृतिमध्येदृष्टव्यैसंसेपलेखवंमम।
इतिश्रीसत्यनारायणव्रतोद्यापनपद्ध।
तिस्समाप्तम्॥ ग्रंथस्यपुस्तकंलिपिकृ
तंपंडितसुंदररामसहात्मनेन याह्रशं

स·उ· लिखित्वाततसुद्धासुद्धवक्तासुधार्ये
२२ न संवत् १५६५ वैशाखसुदि श्री
दस्यांतिथौ १२ सोमवासरे सुभंभू
यात् १ मङ्गलंभवतु: १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative